षोडशः पाठः
१६

# सूक्तयः



**सत्यमेव जयते नानृतम् ।। १ ।।**

– सत्यस्य एव विजयः भवति, असत्यस्य विजयः कदापि न भवतिः । अतः सर्वदा सत्यम् एव वदामः ।

**हितं मनोहारि च दुर्लभं वचः ।। २ ।।**

– अस्मिन् संसारे हितकरं मनोहरं च वचनं दुर्लभमेव अस्ति ।

**विद्या ददाति विनयम् ।। ३ ।।**

– विद्या एव विनयशीलतां ददाति अर्थात् यः शिक्षां प्राप्नोति स एव विनम्रः भवति ।

**माताः भूमिः पुत्रोऽहं पृथिव्याः ।। ४ ।।**

– अस्मान् माता पालयति लालयति च तथैव पृथ्वी अपि अस्मान् पालयति लालयति च। अतः वयं सर्वे अस्याः पृथिव्याः पुत्राः स्मः। भूमिः अस्माकं सर्वेषां माता अस्ति। अतः एषा सर्वदा पूज्या।

**जननी जन्मभूमिश्च स्वर्गादपि गरीयसी ।। ५ ।।**

– या अस्मान् जनयति सा जननी ( माता ) भवति। यत्र च अस्माकं जन्म भवति, सा जन्मभूमिः भवति। माता जन्मभूमिः च स्वर्गलोकाद् अपि श्रेष्ठा भवति।

**यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः ।।६ ।।**

– यत्र नारीणां सम्मानः भवति तत्र देवाः प्रसन्नाः भवन्ति। यत्र नारीणां सम्मानः न भवति तत्र देवताः अपि प्रसन्नाः न भवन्ति। अतः वयं सर्वदा नारीणां सम्मानं कुर्मः।

**सङ्घे शक्तिः कलौ युगे ।। ७ ।।**

– एषः युगः कलियुगः अस्ति। कलौ युगे सङ्गठने एव शक्तिः भवति। अतः वयं सदैव परस्परं मिलित्वा सङ्गठितरूपेण कार्यं कुर्मः।

**श्रद्धावान् लभते ज्ञानम् ।।८।।**

- य: पूर्वजानां स्मरणं, अग्रजानाम् आज्ञापालनं सम्मानं च करोति स: श्रद्धावान् भवति। एतादृश: श्रद्धावान् एव श्रेष्ठं ज्ञानं प्राप्नोति।

**ज्ञानं भार: क्रियां विना ।।९ ।।**

- केवलं ज्ञानप्राप्ति: एव पर्याप्तं न भवति। ज्ञानेन सह कार्यमपि आवश्यकम्। कार्यं (क्रियां) विना ज्ञानम् अपि भार: इव भवति।

**आज्ञा गुरूणां ह्यविचारणीया ।।१० ।।**

- य: शिक्षयति, बोधयति, ज्ञानं प्रददाति अन्धकारस्य च नाशं करोति स एव गुरु:। गुरुजना: सर्वदा छात्राणां हितम् एव कुर्वन्ति। अत: गुरुजनानाम् आज्ञा अवश्यं पालनीया। ( न विचारणीया अपितु पालनीया । विचारार्थं न भवति अपितु पालनार्थम् एव भवति। )

**यत्नं विना रत्नं न लभ्यते ।।११ ।।**

- यत्न: अर्थात् प्रयास:। प्रत्येकं कार्यं प्रयासेन एव सफलं भवति। अत: प्रयासं विना रत्नस्य ( बहुमूल्यपदार्थस्य ) प्राप्ति: अपि असम्भवा ।

**क्रोधो मूलमनर्थानाम् ।।१२ ।।**

- क्रोध: = कोप:। क्रोध: अस्माकं शत्रु: अस्ति। य: क्रोधं करोति स: स्वस्य एव हानिं (अनर्थं) करोति। अनर्थस्य ( हाने: ) मुख्यं कारणं क्रोध एव भवति। अत: कदापि क्रोध: न करणीय:।

**शब्दार्थ:**

| शब्द: | सरलार्थ: | हिन्दी अर्थ |
|---|---|---|
| अनृतम् | असत्यम् | झूठ |
| दुर्लभम् | दुष्प्राप्यम् | कठिनता से प्राप्त |
| पृथिव्या: | भूमे: | धरती का |
| जननी | माता | जन्म देने वाली माता |
| स्वर्गादपि | स्वर्गलोकात् | स्वर्ग से भी |
| गरीयसी | महीयसी | बढ़कर |
| यत्र | यस्मिन् | जहाँ |
| नार्यस्तु | स्त्रिय: | नारियाँ |
| रमन्ते | रमणं कुर्वन्ति | विचरण करते हैं |

| | | |
|---|---|---|
| तत्र | तस्मिन् स्थाने | वहाँ |
| सङ्घे | सङ्घटने | संगठन में |
| कलौ युगे | कलियुगे | कलियुग में |
| श्रद्धावान् | श्रद्धायुक्त: | जो श्रद्धा से युक्त हो |
| लभते | प्राप्नोति | प्राप्त करता है |
| गुरूणां | गुरुजनानाम् | गुरुजी का |
| ह्यविचारणीया | न चिन्तनीया | विचार नहीं की जानी चाहिए |
| यत्नम् | प्रयासम् | प्रयास |
| मूलम् | मुख्यकारणम् | मुख्य कारण |
| अनर्थानाम् | अनिष्टानाम् | हानियों का |

## अभ्यास:

### १. उच्चारणं कुरुत -

| | | | |
|---|---|---|---|
| नानृतम् | दुर्लभम् | ददाति | पुत्रोऽहं |
| पृथिव्या: | जन्मभूमिसश्च | नार्यस्तु | श्रद्धावान् |
| गुरूणाम् | ह्यविचारणीया | अनर्थानाम् | स्वर्गादपि |

### २. एकपदेन उत्तरत -

(क) किं न जयते ?

(ख) विद्या किं ददाति ?

(ग) अनर्थानाम् मूलं क: ?

(घ) क: ज्ञानं लभते ?

(ङ) केषाम् आज्ञा हि विचारणीया ?

### ३. एकवाक्येन उत्तरत -

(क) कीदृशं वच: दुर्लभम् ?

(ख) जननी जन्मभूमिश्च कस्मात् गरीयसी ?

(ग) देवता: कुत्र रमन्ते ?

(घ) कां विना ज्ञानं भार: भवति ?

(ङ) यत्नं विना किं न लभ्यते ?

**४. परस्परं सुमेलयत -**

| | |
|---|---|
| (क) माता भूमिः | कलौ युगे। |
| (ख) सङ्घे शक्तिः | अनर्थानाम्। |
| (ग) हितं मनोहारि च | पुत्रोऽहं पृथिव्याः। |
| (घ) क्रोधो मूलम् | नानृतम्। |
| (ङ) सत्यमेव जयते | दुर्लभं वचः। |

**५. मञ्जूषायां प्रदत्तशब्दानां प्रयोगेण रिक्तस्थानानि पूरयत -**

पूज्यन्ते, गरीयसी, ददाति, ज्ञानं, देवताः,जननी

(क) विद्या .................................... विनयम्।

(ख) .................................... भारः क्रियां विना।

(ग) यत्र नार्यस्तु ...................... रमन्ते तत्र ......... ............।

(घ) .................................... जन्मभूमिश्च स्वार्गादपि गरीयसी।

**६. प्रदत्तानाम् अव्ययपदानां प्रयोगं कृत्वा वाक्यनिर्माणं कुरुत -**

**यथा -** च - रामः गणेशः च आगच्छतः।

(क) न - ....................................................।

(ख) तत्र - ....................................................।

(ग) विना - ....................................................।

(घ) यत्र - ....................................................।

(ङ) एव - ....................................................।

**७. कोष्ठकात् उचित-पदस्य प्रयोगं कृत्वा सूक्तिं पूरयत -**

(क) माता ................................ पुत्रोऽहं पृथिव्याः। (भूमिम्/भूमिः/भूमयः)

(ख) .................................... शक्तिः कलौ युगे। (सङ्घे/सङ्घम्/सङ्घस्य)

(ग) यत्नं विना रत्नम् ............................ लभ्यते। (एव/च/न)

(घ) जननी जन्मभूमिश्च ...................... अपि गरीयसी। (स्वर्गात्/स्वर्गस्य/स्वर्गम्)

(ङ) हितं मनोहारि च .......................... वचः। (दुर्लभेन/दुर्लभम्/दुर्लभस्य)

## योग्यता-विस्तारः

१. प्रियाः छात्राः ! अस्मिन् पाठे यूयं संस्कृतसूक्तीनाम् अध्ययनं कृतवन्तः। संस्कृतभाषायाम् अनेकाः सूक्तयः सन्ति। सामान्यजीवने अपि जनाः एतासां सूक्तीनां प्रयोगं कुर्वन्ति। अनेकाः सूक्तयः तु विभिन्न-संस्थानां विभागानां च ध्येयवाक्यरूपेण अपि प्रयुज्यन्ते। यथा - 'सत्यमेव जयते' इति अस्माकं भारतसर्वकारस्य ध्येयवाक्यम् अस्ति।

सूक्तीनां प्रयोगेण भाषायां विशिष्टता आगच्छति। अतः सूक्तीनां स्मरणं प्रयोगं च अवश्यमेव करणीयः। युष्माकं कृते काश्चन अन्याः सूक्तयः अत्र सन्ति -

(क) लोभः पापस्य कारणम्।
(ख) नास्ति विद्यासमं चक्षुः।
(ग) विद्याधनं सर्वधनप्रधानम्।
(घ) बुद्धिर्यस्य बलं तस्य।
(ङ) आचारः परमो धर्मः।
(च) प्रारब्धम् उत्तमजनाः न परित्यजन्ति।
(छ) आत्मनः प्रतिकूलानि परेषां न समाचरेत्।

⇨ **एतत् अपि कुरुत -**

- यूयं सूक्तीनां स्मरणं कृत्वा कर्गदफलके लिखित्वा कक्षायाः भित्तिषु स्थापयत।

**अध्यापकाय निर्देशः -**

। अध्यापकः एतासां सूक्तीनाम् अर्थम् अपि बोधयेत्।

## आगच्छन्तु, वयं खेलामः

प्रियाः छात्राः ! युष्माभिः द्वादशे पाठे सुभाषितानि पठितानि, एवञ्च अस्मिन् पाठे सूक्तयः पठिताः। एतेषाम् आधारेण वयम् एकां क्रीडां कुर्मः -

### सूक्तिकथन-क्रीडा

अध्यापकः छात्राणां गणद्वयं करोति। एकः गणः द्वितीयगणस्य सम्मुखे उपविशति। प्रथमगणस्य एकः छात्रः एकां सूक्तिम् अथवा एकं सुभाषितं वदति। यथा- सत्यमेव जयते नानृतम्। द्वितीयगणस्य एकः छात्रः काम् अपि अन्यां सूक्तिम् अथवा अन्यत् सुभाषितं वदति। अनेन एव क्रमेण छात्राः सूक्तिवाक्यानि सुभाषितानि च वदन्ति। अत्र ध्यानं दातव्यं यत् सूक्तीनां सुभाषितानां च पुनरावृत्तिः न भवेत्। सूक्तीनां सुभाषितानां च उच्चारणं स्पष्टं पूर्णं च भवेत्। यः गणः सूक्तिम् अथवा सुभाषितं वक्तुं न शक्नोति, तस्य गणस्य पराजयः भवति।